## मन्त्रेष्वाङ्यादेरात्मनः । (१४१/३८८४)

मन्त्रेषु आङि परतः आत्मनः आदेर्लोपो भवति[1] । त्मना देवेभ्यः । त्मना सोमेषु । मन्त्रेषु इति किम्? आत्मना कृतम् । आङि इति किम् ? [2]यदात्मनस्तन्नो वरिष्ठा ।

[७९७] आङोऽन्यत्रापि दृश्यते ।

[3]'त्मन्या समञ्जन्' (ऋ. १०.११०.१०) ॥

## ति विंशतेर्डिति । (१४२/८४४)

भस्य विंशतेः तिशब्दस्य डिति प्रत्यये लोपो भवति । विंशत्या क्रीतः विंशकः[4] । विंशं शतम्[5] । [6]विंशतेः पूरणो विंशः[7] । एकविंशः । डिति इति किम् ? विंशत्या ॥

## टेः । (१४३/३१८)

टिसञ्ज्ञकस्य डिति प्रत्यये परतः लोपो भवति । कुमुद्वान् । नड्वान् । वेतस्वान्[8] । उपसरजः । मन्दुरजः । त्रिंशता क्रीतः त्रिंशकः । डिति अभस्यापि [9]अनुबन्धकरणसामर्थ्यात् टिलोपो भवति ॥

## नस्तद्धिते । (१४४/६७०)

नकारान्तस्य भस्य टेः लोपो भवति तद्धिते परतः । आग्निशर्मिः । औडुलोमिः[10] । बाह्वादित्वाद् (४.१.९६/१०९६) इञ् प्रत्ययः । नः इति किम् ? सात्वतः । तद्धिते इति किम् ? [11]शर्मणा । शर्मणे ।

[७९८] [12]नान्तस्य टिलोपे सब्रह्मचारिपीठसर्पिकलापिकुथुमितैतिलिजाजलिलाङ्गलिशिलालिशिखण्डि-सूकरसद्मसुपर्वणामुपसङ्ख्यानं [13]कर्तव्यम् । (म.भा. ३.२२५) ।

अत्र ये इन्नन्ताः तेषाम् 'इनण्यनपत्ये' (६.४.१६४/१२४५) इति प्रकृतिभावः प्राप्तः, ये [14]तु अन्नन्ताः तेषाम् 'अन्' (६.४.१६७/११५५) इति । सब्रह्मचारिणः इमे साब्रह्मचाराः, [15]पीठसर्पिणः पैठसर्पाः । कलापिना प्रोक्तमधीयते कालापाः,[16] कुथुमिनः[17] कौथुमाः । तैतिलिजाजलिनौ आचार्यौ, तत्कृतो ग्रन्थः उपचारात् तैतिलि-जाजलिशब्दाभ्यामभिधीयते, तं [18]ग्रन्थमधीयते तैतिलाः, जाजलाः[19] । शैशिकेष्वर्थेषु [20]वृद्धत्वादत्र छः प्राप्नोति ।

---

1. आङ् इति तृतीयैकवचनस्य पूर्वाचार्याणां सञ्ज्ञा त्मना पितृभ्यः इत्यधिकम् ह. 2. यदात्मनस्तं देवो वरिष्ठां इ, यदात्मनस्तन्नोऽवतिष्ठते वरिष्ठः ह, यदात्मनस्तन्नो वरिष्ठम् ड, यदात्मनि तन्नो मे विरिष्ट क. अ. 3. त्मन्या समज्जत् मनि यज सोमेभ्यः ह, त्मन्या समञ्जन् देवानाम् इ. 4. विंशतित्रिंशद्भ्याम् ड्वुन्नसंज्ञायाम् इति ड्वुन् इति इत्यधिकम् ह.फ. 5. विंशतिरधिकाऽस्मिन् शते । तदस्मिन् अधिकमिति दशान्तात् डः दशान्त-विंशतेश्च इति डः इत्यधिकम् ह.फ. 6. उदाहरणमिदं नास्ति इ. 7. तस्य पूरणे डट् इत्यधिकम् फ. ह. 8. कुमुदनडवेतसेभ्यो मतुप् इत्यधिकम् फ.ह. 9. अनुबन्धकरणे क. 10. शारलौमिः इत्यधिकम् फ. 11. शर्मणः इ. 12. नकारान्तस्य 13. कर्तव्यम् नास्ति फ. 14. तु नास्ति फ. 15. नास्ति फ, पीठसर्पिण इमे ह. 16. कलापिवैशम्पयनान्तेवासिभ्यश्च इति णिनेः प्राप्तस्यापवादः कलापिनो अण् इति अण् इत्यधिकम् फ. 17. इमे इत्यधिकम् फ. 18. ग्रन्थम् नास्ति क. 19. तदधीते इत्यण् इत्यधिकम् फ. 20. वृद्धाच्छः फ. ह.

THE SANSKRIT LIBRARY
FAIRFIELD, IA 52556